श्री परशुराम स्तुतिः

श्री परशुराम स्तुतिः

कुलाचला यस्य महीं द्विजेभ्यः
प्रयच्छतः सीमदृषत्त्वमापुः |
बभूवुरुत्सर्गजलं समुद्राः
स रैणुकेयः श्रियमातनोतु || 1 ||

नाशिष्यः किमभूद्भवः किमभवन्नापुत्रिणी रेणुका
नाभूद्विश्वमकार्मुकं किमिति वः प्रीणातु रामत्रपा |
विप्राणां प्रतिमंदिरं मणिगणोन्मिश्राणि दंडाहते-
-र्नाब्धीनां स मया यमोऽपि महिषेणांभांसि नोद्वाहितः || 2 ||

पायाद्वो जमदग्निवंशतिलको वीरव्रतालंकृतो
रामो नाम मुनीश्वरो नृपवधे भास्वत्कुठारायुधः |
येनाशेषहताहितांगरुधिरैः संतर्पिताः पूर्वजाः
भक्त्या चाश्वमखे समुद्रवसना भूर्हंतकारीकृता || 3 ||

द्वारे कल्पतरुं गृहे सुरगवीं चिंतामणीनंगदे
पीयूषं सरसीषु विप्रवदने विद्याश्चतस्रो दश |
एवं कर्तुमयं तपस्यति भृगोर्वंशावतंसो मुनिः
पायाद्वोऽखिलराजकक्षयकरो भूदेवभूषामणिः || 4 ||

इति श्री परशुराम स्तुतिः |